**दिनाङ्क :-20.02.2025**

**प्रातः - 06:55**

**<u>दिल्ली- मुख्यमंत्री</u>**

श्रीमती रेखा गुप्ता दिल्लीप्रदेशस्य नवमुख्यमन्त्रिरूपे देहलीस्थस्थे "रामलीला मैदान" इति प्राङ्गणे पदगोपनीयतायाः शपथवचनं स्वीकुर्यात्। एततपूर्वं गतदिने सायंकाले भाजपादलस्य विधायकदलीयोपवेशने श्रीमती रेखा गुप्ता दिल्ल्याः मुख्यमन्त्रिरूपेण सर्वसम्मत्या चिता । मुख्यमन्त्रिपदाय स्वीय- नामोद्घोषणानन्तरं श्रीमती रेखा गुप्ता राजनिवासे उपराज्यपालेन 'विनयकुमार सक्सेना' इत्यमुना साकं मेलनं कृतवती ।

उपराज्यपालवर्यः अद्य मध्याहे सार्धद्वादशवादने रेखा गुप्ता इत्येतस्यै पदगोपनीयतायाः शपथं दापयिष्यति। एतस्मिन् भव्यशपथग्रहणसमारोहे प्रधानमन्त्री नरेन्द्रमोदी, गृहमन्त्री अमितशाहः, रक्षामन्त्री राजनाथसिंहः नैके वरिष्ठाः नेतारश्चापि सम्मिलिताः भवितारः । एतस्मिन् समारोहे प्रायशः विंशतिः राज्यानां मुख्यमन्त्रिणः उपमुख्यमन्त्रिणश्चापि सम्मिलिताः स्युः । अवधेयास्पदं यत् श्रीमती रेखा गुप्ता दिल्ली- विधानसभानिर्वाचनेषु शालीमार बाग इति आसन्देन निजिता ।

तया सर्वप्रथमं 'अखिल भारतीय विद्यार्थी परिषद् इत्येतेन सह स्वीया राजनीतिकी यात्रा समारब्धा। दिल्ली विश्वविद्यालय-छात्र संघस्यापि अध्यक्षा आसीत् । दिल्ली- भाजपा-महिला मोर्चा इत्यत्रापि महासचिवरूपेण तया कार्याचरणं समनुष्ठितम्।

**<u>विदेशमंत्री</u>**

जी-विंशति- विदेशमन्त्रिणाम् उपवेशने भागग्रहणाय विदेशमन्त्री डॉ. सुब्रह्मण्यम- जयशंकरः दक्षिण अफ्रीकादेशस्य जोहन्सबर्ग- नगरस्य द्विदिवसीय- यात्रारतो भविष्यति। एषा द्विदिवसीययात्रा अद्य प्रभृति समारब्धा स्यात्। दक्षिण- अफ्रीकायाः अन्ताराष्ट्रिय - सहयोग- समबन्ध मन्त्रिणः रोनाल्ड- लामोला इत्येतस्य

निमन्त्रे डॉ. जयशंकरः जोहन्सबर्गनगरेम् अद्य प्राप्येत्। विदेशमन्त्रिणाम् उपवेशनावधौ डॉ. जयशंकरः द्विपक्षीयां वार्तामपि समाचरेत् इत्याशा वर्तते।

**प्रधानमन्त्री नरेन्द्रमोदी**

प्रधानमन्त्री नरेन्द्रमोदी श्वः नवदेहलीस्थे भारतमंडपम इतिस्थले **साउल लीडरशिप कॉन्क्लेव** इत्येतस्य प्रथमसंस्करणस्य उद्घाटनं करिष्यति। एतस्मिन् कार्यक्रमे भूटानस्य प्रधानमन्त्री **दाशो शेरिंग तोबगे** इत्यसौ मुख्यतिथिरूपेण उद्बोधनं प्रदास्यति। द्विदिवसीये एतस्मिन् कार्यक्रमे राजनीति- क्रीडा- कला- संचार- सार्वजनिक नीति- व्यवसाय- सद्वशेषु विविधक्षेत्रेषु प्रेरक- जीवन- यात्रा विचाराः विनिययीभूताः भविष्यन्ति। एतेन कार्यक्रमेण सहयोग- विचार- नेतृत्वस्य परिस्यितिकीय तन्त्रस्य सम्वर्धनं भविष्यति, येन युवानः प्रेरिताः स्युः।

**महाकुम्भमहोत्सवः**

उत्तरप्रदेशस्य प्रयागराजतीर्थे समायोज्ययाने महाकुम्भमहोत्सवान्तर्गते आध्यत्मिकता- संस्कृति- इति विषयम् आधिकृत्य एका सङ्गोष्ठी महाकुम्भ- परिसरे समायोजिता।

एतस्यां सङ्गोष्ठयां यूनेस्को- इलाहाबाद विश्वविद्यालयं समेत्य नैके शिक्षाविदः भागं गृहीतवन्ता अथ पूर्णइतिहासे महाकुम्भस्य महत्व- संदर्भे- विषयेषु विस्तरेण विचारन् प्रकटिवन्तः। इलाहाबाद विश्विद्यालस्य इतिहास विभागस्य पूर्वविभागाध्यक्षेण हेरम्ब चतुर्वेदी इत्यमुना निगदितं यत् यूरेस्को इति संस्थया सप्तदशोतर द्विसहस्त्रतमे वर्षे महाकुम्भ महोत्सवाय अमूर्त सांस्कृतिक निधिरूपेण मान्यता प्रदत्ता, अथ एषः महोत्सवः ज्योतिषीय- गणनाधारितं महत्वपूर्णं पर्व इति।

**क्रिकेट**

आईसीसी चैम्पियन्स ट्रॉफी इति क्रिकेट् प्रतिस्पर्धायां गतदिने समायोजिते प्रथमे द्वन्द्वे न्यूजीलैण्डदलेन पाकिस्तान दलं षष्टिधावनाकैः पराजितम्। स्पर्धायां प्रथमं दण्डेन क्रीडयता न्यूजीलैण्डदलेन विंशत्याधिकत्रिशतं धावनांकाः समार्जिताः, प्रत्युत्तरे पाकिस्तानदलस्य पर्यायः पञ्चाशदाधिक द्विशतं धावनांकेषु एव समाप्तो जाताः

प्रतिस्पर्धायां रोहितशर्मणः नेतृत्वे भारतीयदलम् अद्य मध्यान्हे दुबय्याः अन्ताराष्ट्रियक्रीडांगणे बांग्लादेशदलं विरूध्य क्रीडिष्यति। स्पर्धा एषा मध्यान्हे सार्धद्विवादने समारभेत्।